श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्) अनुगृहीता

# ॥ श्री महालक्ष्म्याः अष्टोत्तरशतनामगुणस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री महालक्ष्म्याः अष्टोत्तरशतनामगुणस्तुतिः ॥

देवश्रीः प्रियदर्शिनी हितकरी सर्वेष्टदा माधवी
वेदश्रीः श्रुतिमार्गिणी सुविमला सर्वोत्तरा शाश्वती।
ब्रह्मश्रीः द्रुहिणप्रसूः सुचरिता सर्वाकृतिः भार्गवी
पुण्यश्रीः हृदयङ्गमा शुभकरी विश्वम्भरा पातु नः ॥ 1 ॥

सर्वेष्टा कलिनाशिनी सुतरुणी भोगप्रिया कामिनी
विश्वश्रीः परभक्तिदा कलरवा प्रोत्तारिणी शान्तिदा।
सत्कीर्तिः समदर्शिनी दृढमतिः रत्नावळी रुक्मिणी
पद्माक्षी विजयप्रदा सुरसिका नारायणी पातु नः ॥ 2 ॥

सर्वज्ञा गरुडासना भगवती यज्ञाशिनी पाविनी
गायत्री गुणभूषणा सुगहना मेधाविनी भोगिनी।
दिव्याङ्गा सुफलप्रदा सुमधुरा पद्मासिनी हारिणी
राजश्रीः शुभदेवता सुवदना चारुस्मिता पातु नः ॥ 3 ॥

योगक्षेमवहा त्रिलोकजननी ब्रह्मस्तुता सुस्थिरा
कूटस्था कुललक्षणा प्रथमजा माता वरिष्ठाऽनघा।
सर्वज्ञा कुलनन्दिनी द्युतिमती धीरा मनीषाकृतिः
भद्राङ्गी सुगुणोत्तरा विजयदा शोभानना पातु नः ॥ 4 ॥

सौम्या वेदमयी क्षमा गुणमयी दारिद्र्यविध्वंसिनी
सुप्रीता वरदा रमा सुनयना विष्णुप्रिया पद्मिनी।
धर्मोद्धारकृतादरा सुहृदया दीनाश्रया मोदिनी
गम्भीरा कमलेक्षणा श्रुतिहिता धर्मोदया पातु नः ॥ 5 ॥

पूर्णानन्दमयी यशस्सुखकरी तापत्रयोन्मूलिनी
पद्मा योगकरी मुकुन्ददयिता विश्वप्रिया क्षेमदा।
सर्वारिष्टनिवारिणी सुफलदा सर्वेश्वरी सर्वदा
श्रीरित्यन्वहं आदरात् पठति योऽपायात् स संरक्ष्यते॥ **6**॥

लक्ष्मीषट्कमिदं ददाति पठतां सद्यः फलं स्वेप्सितं
आम्नायान्त पुराण सूक्तविहिता नामावळिः श्रेयसी।
सैषेति स्तवरूपतो व्यरचयत् गोपालसूरिर्मुदा
नाम्नां अष्टपरां शतीं समुचितां षड्लोकतोऽपूरयत्॥ 7॥

॥ इति श्री महालक्ष्म्याः अष्टोत्तरशतनामगुणस्तुतिः समाप्ता॥